# B.A. (Honours) Semester V Examination, 2014

## Sanskrit (Honours)

## Paper : H-12

**Time : Three Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. मन्त्रद्वयस्य संस्कृतेन व्याख्या कार्या– 6×2=12

(क) स नः पितेव सूनवेऽग्ने सूपायनो भव।

सचस्वा नः स्वस्तये।।

(ख) यो जात एव प्रथमो मनस्वा-

न्देवो देवान्क्रतुना पर्यभूषत्।

यस्य शुष्माद्रोदसी अभ्यसेता

नृम्णस्य मह्ना स जनास इन्द्रः।।

(ग) आपो ह यद्बृहतीर्विश्वमाय–

न्गर्भं दधाना जनयन्तीरग्निम्।

ततो देवानां समवर्ततासुरेकः

कस्मै देवाय हविषा विधेम।।

(घ) अग्ने यं यज्ञमध्वरं

विश्वतः परिभूरसि।

स इद् देवेषु गच्छति।।

2. प्रथमप्रश्नगतेषु मन्त्रेषु यथेच्छं कस्यचिदेकस्य मन्त्रस्य स्वरसञ्चारनिर्देशसहकृतः पदपाठः प्रदर्शनीयः। 6

3. अधोलिखितेषु मन्त्रद्वयं वङ्गभाषया आङ्गलभाषया हिन्दीभाषया भा अनूद्यताम्– 4×2=8

(क) अहं रुद्राय धनुरातनोमि

ब्रह्मद्विषे शरवे हन्तवा उ।

अहं जनाय समदं कृणोमि

अहं द्यावापृथिवी आ विवेश।।

(ख) को अद्धा वेद क इह प्र वोचत्

कुत आजाता कुत इयं विसृष्टिः।

अर्वाग्देवा अस्य विसर्जनेना–

था को वेद यत आबभूव।।

(ग) जाया तप्यते कितवस्य हीना

माता पुत्रस्य चरतः क्व स्वित्।

ऋणावा बिभ्यद्धनमिच्छमानो

ऽन्येषामस्तमुप नक्तमेति।।

P.T.O

(घ) यं क्रन्दसी अवसा तस्तभाने
अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति
कस्मै देवाय हविषा विधेम।।

4. हिरण्यगर्भसूक्तस्य वाक्सूक्तस्य वा दार्शनिकमहत्त्वं प्रतिपादयत। 7

5. अग्निदेवताया उत इन्द्रदेवताया वैशिष्ट्यं पर्यालोचयत। 7

---